केन्द्रीय विद्यालय संगठन

केन्द्रीय विद्यालय नं.१

**KENDRIYA VIDYALAYA NO.1**

*श्री विजयनग र, विशाखापट्टणम - ५३०००७*

*SRI VIJAYNAGAR, VISAKHAPATNAM - 530007*

*Phone No. 0891-2558357, Fax: 0891-2711278*

*E-mail: kv1svnvskp@yahoo.com, Website: http://kv1svnvskp.org*

Accredited by the BRITISH COUNCIL International Award

दिनाङ्कः 20.08.2019

## संस्कृतसप्ताहस्य प्रतिनिवेदनम्

केन्द्रीयविद्यालयसंगठनम् मुख्यालयस्य आदेशानुसारं अस्माकं विद्यालये १३.०८.२०१९ दिनाङ्कादारभ्य १९.०८.२०१९ पर्यन्तं संस्कृतसप्ताहस्य कार्यक्रमाः अत्यन्त भव्यतया आयोजिताः। सप्ताहस्य प्रथमदिवसे विद्यालयस्य प्राचार्यमहोदयः श्रीमान् पी. के. पुरोहितः संस्कृतसप्ताहस्य सरस्वत्याः चरणयोः माल्यार्पणं कुर्वन् उद्घाटनम् अत्यन्तवैभवेन कृतवान्। संस्कृतशिक्षकस्य श्री जी.कृष्ण महोदयस्य संयोजने १३.०८.२०१९ दिनाङ्कादारभ्य १९.०८.२०१९ पर्यन्तं प्रांतः कालीन प्रार्थना सभायाः कार्यक्रमास्सर्वे संस्कृते निर्वाहिताः । सप्ताहस्य प्रथमदिवसादारभ्य सप्ताहस्य अन्तिमदिनपर्यन्तं प्रातः कालीन प्रार्थना सभा देववाण्याः संस्कृतभाषायाः मधुरमञ्जुलपदैः प्रतिध्वनिता आसीत् । विद्यालयस्य प्रशिक्षित स्नातक संस्कृतशिक्षकः श्रीमान् अर्.राममोहन् रावः (आंशकालिक) संस्कृतसप्ताहमुद्दिश्य भाषणं कुर्वन् संस्कृतभाषायाः औन्नत्यमधिकृत्य स्व विचारान् प्रकटीकृतवान् । सप्ताहस्य अन्तिमदिने संस्कृत शिक्षकः श्री जी.कृष्णः संस्कृते भाषणं कुर्वन् आधुनिकयुगे विश्वमानव कल्याणाय संस्कृतस्य अध्ययनम् अत्यन्तावश्यकमिति सोदाहरणं स्पष्टीकृतवान् । समग्र विश्वे शान्तिस्थापनाय,विश्वबन्धुत्वभावना समुत्पादनाय च संस्कृतस्य भूमिका अनुपमा इति स्पष्टीकृतवान् ।समाजे आतंकवादनिर्मूलनाय जनानां हृदयेषु " वसुधैव कुटुम्बकम् " इति भावना जागरणाय संस्कृतम् दिव्यौषधमिति उद्घोषितवान् । " मनसा सततं स्मरणीयम् वचसा सततं वदनीयं, सुरस सुबोधा विश्वमनोज्ञा ललिता हृद्या रमणीया .... इत्यादि संस्कृतगीतैः संस्कृतस्य सारल्यं,माधुर्यं, लालित्यं च वर्णयन्तः छात्राः विद्यालयस्य प्राङ्गणं संस्कृतमयम् अकुर्वन् । संस्कृतसप्ताहान्तर्गते श्लोकपठनम्,प्रश्नोत्तरी,निबन्धलेखनम्,गीतगायनम् आदि विविधाः स्पर्धाः आयोजिताः । सर्वासु स्पर्धासु छत्राः महतोल्लासेन भूरि संख्यायां भागं गृह्णन्ति स्म । संस्कृतसप्ताहस्य समापन दिवसे प्राचार्यः श्री पी.के.पुरोहितः विविध स्पर्धासु विजेतॄन् छत्रान् स्वीयाशीर्वचनैः अभिनन्दितवान् ।प्राचार्यः विजेतृभ्यः छात्रेभ्यः पुरस्कारप्रदानमकरोत् ।अनुग्रहभाषणं कुर्वन् श्री पुरोहितः "संस्कृतम् भारतीयज्ञान-विज्ञानयोः निधिः,भारतीयसंस्कृते अवगमनाय ,आत्मतत्त्वज्ञानाय च संस्कृतभाषा कुञ्चिका" इति च स्पष्टीकृतवान् । संस्कृतशिक्षकः श्री जी.कृष्णः संस्कृतसप्ताहस्य सफलतायै परोक्षरूपेण,प्रत्यक्षरूपेण च ये सहयोगं कृतवन्तः तेभ्यः सर्वेभ्यः कार्तज्ञं व्याहरत् ।अनेनैव सम्पन्नतामाप्नुवन्ति स्म संस्कृतसाप्ताहिकमहोत्सवाः

जयतु भारतम् ! जयतु संस्कृतम् !!

जी.कृष्णः

(जी.कृष्णः)

संयोजकः

KENDRIYA VIDYALAYA S.V.NAGAR Visakhapatnam

पी.के.पुरोहित

(पी.के.पुरोहितः)

प्राचार्यः

प्राचार्य / Principal
केन्द्रीय विद्यालय नं.१
Kendriya Vidyala No.1
श्री विजयनगर, Sri Vijayanagar,
विशाखापट्नम, Visakhapatnam-530 007

# संस्कृत सप्ताहस्य छायाचित्राणि



















केन्द्रीय विद्यालय नं. १
KENDRIYA VIDYALAYA No.1








WELCOME

